National Journal of
Hindi & Sanskrit Research

**ISSN:**
NJHSR 2015; 1(1): 06-12
© 2015 NJHSR
www.sanskritarticle.com
Received: 23-07-2015
Accepted: 25-07-2015

**डॉ. कुलदीपकुमार**
सहायकाचार्य जैनदर्शन विभाग,
श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत
विद्यापीठ, नई दिल्ली-110016

**Correspondence:**
**डॉ. कुलदीपकुमार**
सहायकाचार्य जैनदर्शन विभाग,
श्री लाल बहादुर शास्त्री राष्ट्रीय संस्कृत
विद्यापीठ, नई दिल्ली-110016

# अर्हद्दर्शने जीव विवेचनम

**डॉ. कुलदीपकुमारः**

**भवबीजाङ्कुरजनना रागाद्या क्षयमुपगताः यस्य।**
**ब्रह्मा वा विष्णुर्वा हरो जिनो वा नमस्तस्मै।।**[1]

**भूमिका-**

भारतीयवाङ्मये जैनदर्शनं एकं प्राचीनदर्शनं विद्यते अस्य दर्शनस्य अनेकानि पुरातनानि नामानि राजन्ते। यथा अर्हद्दर्शनं, निग्रन्थदर्शनं, अहिंसादर्शनं, स्याद्वाददर्शनं, अनेकान्तदर्शनं चेत्यादीनि।
येन प्रकारेण विभिन्नदर्शनानां प्रवर्तकाः दृषिमहर्षयः अभवन्, तेन प्रकारेण जैनदर्शनस्य प्रवर्तकः कोऽपि व्यक्तिविशेषः नास्ति। जैनशब्दः 'जिन' शब्दात् निष्पन्नोऽस्ति। जिनशब्दश्च संस्कृतभाषायाः 'जि' धतो 'नक्' प्रत्यये सति नष्पन्नः। जिनशब्दस्यार्थो वर्तते यो जनः

**'अनेकभवगहनविषयव्यसनप्रापणहेतून् कर्मारातीन् जयतीति जिनः।**[2]

एतादृशैः जिनै उपदिष्टदर्शनं जैनदर्शनमिति उच्यते। प्रत्येकं युगे चतुर्विंशतितीर्थंकराः भवन्ति, तथा ते अनादिकालात् प्रचलत् धर्मदर्शनञ्च प्रतिपादयन्ति। वर्तमानयुगे दृषभदेवादारभ्य महावीरपर्यन्तचतुर्विंशंति तीर्थघङ्करैः जैनधर्मदर्शनयोः सिद्धान्तः प्रतिपादितः। तदन्तरं अनेके जैनदर्शनमर्मज्ञाः आचार्याः अभवन्। तेषाम् आचार्याणां न केवलं जैनदर्शने अपितु सम्पूर्णभारतीयवाङ्मये महत्त्वपूर्णं स्थानं विद्यते। सामाजिक-आर्थिक-नैतिक-पारमार्थिक-तात्त्विक-वैचारिक- सैद्धान्तिक-ज्ञानविज्ञानादिविषय-चिन्तनदृष्ट्या तेषां सर्वेषु क्षेत्रोषु विशिष्टस्थानं विद्यत एंव। तत्रा च यथा आचार्यैः ज्ञानविज्ञानधरायाः मार्मिकचिन्तनं कृतं तथैव आचार्यैः पदार्थतत्त्वखगोलसाहित्य कर्मसिद्धान्तात्मतत्त्वादि विषयाणां दार्शनिकदृष्ट्या वैज्ञानिकदृष्ट्या च शोधपूर्णं चिन्तनं विश्लेषणं च कृतम्।
प्रेक्षणार्थकाद् दृश् धतो(दृशिर प्रेक्षणे) ल्युट्-प्रत्यये कृते दर्शनशब्दो निष्पद्यते। संस्कृतभाषायाम् अयं शब्दः दर्शनं नपुसंकलिङ्गे विराजते। सर्वप्रथमं प्रश्नोऽयं उद्भवति यत् किं नाम दर्शनम्? अस्य व्युत्पत्तिलभ्यार्थोऽस्ति-दृश्यते अनेन इति दर्शनम्। दर्शनशब्दस्य राष्ट्रभाषायां अनेके अर्थाः सन्ति यथा देखना, दर्शन करना, निरीक्षण करना, जानना, समझना, प्रत्यक्ष जानना, परिदर्शन करना, दृष्टि, आँख, निरीक्षण परीक्षा, दिखलाना, प्रदर्शन करना, विवेक, समझ, बुद्धि, निर्णय, अवबोध, धर्मिकज्ञान, दर्शनशास्त्रा, दपर्ण, शास्त्रा में व्याख्यात कोई नियम या सिद्धान्त इत्यादि।

देवभाषा संस्कृतेऽपि एते एव अर्थाः विराजन्ते अन्यथा नावगन्तव्यम्। स्यशब्दस्य व्युत्पत्तिदृष्ट्या अर्थदृष्ट्या च स्पष्टरूपेण कथयितुं शक्यते यत् येन माध्यमेन साधनेनवा इदं विश्वम्, इदं वस्तुजातम्, ब्रह्म, जीवात्मा, अन्तरात्मा, परमात्मा, प्रकृतिश्च, यथातथ्येन दृश्यते, निरीक्ष्येत, परीक्ष्यते, समीक्ष्यते, विविच्यते च तद् दर्शनम्। अतः वयमत्रा स्पष्टतया वक्तुमः शक्न यत् आध्यात्मिकम्, आधिदैविकं आधिभौतिकं च प्ररूपणं विवेचनं वा दर्शनशब्दान्तर्गतं विराजते।

किं ब्रह्म ? तस्य किं स्वरूपम् ? कः ईश्वरः ? कः जीवः ? कः अजीवः ? किं मूलतत्त्वम् ? के तस्य प्राप्तेरुपायाः ? अस्मिन् जगति किं शाश्वततत्त्वम् ? इयं सृष्टि कुतः समागता ? किं पुनर्जन्म ? किं शरीरम् ? जीवस्य उद्भूतिः कुतः संजाता ? किं तस्य लक्ष्यम् ? कथं मोक्षस्य प्राप्तिर्भवति ? आत्मा चेतनाऽचेतनो वा ? अस्याः सृष्टेः कः कर्ता ? किं जीवनस्य कर्तव्यमकर्तव्यम् वा ? जीवनस्य मूलोद्देश्यं किम्? इत्यादिनां प्रश्नानां समाधनं यत्रा सुसूक्ष्मदृष्ट्या विविच्यन्ते तद् दर्शनम्। सूक्ष्मदृष्ट्या इदमपि वक्तुं शक्यते यत् तत्त्वार्थदर्शनमेव दर्शनम्। यथोच्यते केनोपनिषदि-

**'केनेषितं प्रतति प्रेषितं मनः, केन प्राणः प्रथमः प्रैति युक्तः।**
**केनेषिता वाचमिमां वदन्ति, चक्षुः श्रोत्रां क उदेवो युनक्ति।।**[3]

भारते प्रचलितदर्शनानां वर्गीकरणम् सर्वप्रथमं वयम् अस्माकं देशे प्रचलितनि दर्शनानि द्विध विभक्तं कर्तुं शक्नुमः भारतीयदर्शनानि अभारतीयदर्शनानि च। येषां दर्शनानां प्रादुर्भावः भारतादि पूर्वी देशेषु अभवत् ते सन्ति भारतीयदर्शनानि। भारतीयदर्शनानां अपरनाम पूर्वीदर्शनमपि वर्तते।
येषां दर्शनानां प्रादुर्भावः यूरोपादि पाश्चात्यदेशेषु अभवत् ते सन्ति अभारतीयदर्शनानि। एतेषामपरनाम पाश्चात्यदर्शनमप्यस्ति।

भारतीयदर्शनानि मुख्यरूपेण द्विध विभज्यन्ते वैदिकदर्शनानि अवैदिकदर्शनानि च। यानि दर्शनानि वेदानां प्रामाण्यम् अन्गीकुर्वन्ति, तानि वैदिकदर्शनानि इति कथयन्ते। यानि च वेदानां प्रामाण्यं नाङ्गीकुर्वन्ति तानि अवैदिकदर्शनानि। तत्रा न्यायवैशेषिकसांख्ययोग मीमांसावेदान्ताख्यानि षड्दर्शनानि वैदिकदर्शनानि अभिधीयन्ते। चार्वाकजैनबौद्धदर्शनानि च त्रीणि अवैदिकदर्शनानि निर्दिश्यन्ते। एतद् विभाजनं वेदानां प्रामाण्याप्रामाण्यमूलकमेवेति। अयमत्रा सम्यक्तया ज्ञातव्यम्। जना अनेन एव कारणेन अवैदिकदर्शनान

नास्तिकदर्शनमपि प्रतिपादयन्ते यत् समीचीनं नास्ति। यतोहि जैनबौद्धदर्शनयोरपि वेदानां प्रामाण्यं रूपान्तरेण व्यवहारबुद्धया वा स्वीक्रियते एव। तथा पाणिनिव्याकरणदृष्ट्या अपि यानि अपि आस्तिकस्य लक्षणानि सन्ति। तानि सर्वाणि उभयोः दर्शनयोः विराजते नास्ति अत्रा कापि शंकायाः स्थानम्। जैदर्शने मुख्यरूपेण परम्परे द्वे स्तः। एका दिगम्बर परम्परा अपरा तु श्वेताम्बर परम्परा। उभयो परम्परयोः परस्परं यो मतभेदोऽस्ति स न तु दार्शनिकमतभेदाऽस्ति अपितु आगमिकाऽस्ति। अतएव अनयोः द्वयोः दर्शनयोः साहित्यमपि अति विशालमस्ति।

आगमग्रन्थानां विषये दिगम्बरपरम्परायां श्वेताम्बरपरम्परायाञ्च एको मतभेदो दृश्यते। श्वेताम्बरपरम्परानुसारं भगवतः महावीहरस्य निसृतः द्वादशाण्गानि अद्यावधि सुरक्षितानि सन्ति। तत्रा निगद्यते यत् तेषां द्वादशाण्गनामाधरेण भगवतः महावीरस्य सुकाले सधर्मास्वामीद्वारा आगमग्रन्थानां रचना कृता इति। किन्तु दिगम्बरपरम्परानुसारं भगवतः दृषभदेवानां सुसमये एव द्वादशाण्गानां रचना जाता। परन्तु लिखितरूपेण ते न सन्ति, अपितु मौखिकरूपेण श्रुतपरम्परया प्रचलति स्म। तदनन्तरमपि सर्वेषां तीर्थंकराणां समये अपि गणधारैः द्वादशाण्गाना रचना जायमाना एव आसीत्। परन्तु तीर्थंकमहावीरानन्तरं शैनः शनैः जीवानां मन्दबुद्धिकारणात् कलिकालस्य प्रभावात् वा तत् लुप्तमभवत्। तदनन्तरं द्वादशतममंग्ग दृष्टिवादस्मैव किञ्चिदंशः गुरुपरम्परया स्मृतौ सुरक्षितमासीत् स्मृति आधरेणैव च विभिन्नौ आचार्यैः आगमग्रन्थानां रचना विहिता। अयमेवास्ति मतभेदो द्वयोः परम्परयोः।

दिगम्बरपरम्परानुसारं ई. पूर्व. प्रथमशताब्धं सर्वप्रथमं धरसेनाचार्येण 'षट्खण्डागम' इति नामकस्य ग्रन्थस्य रचना आरब्धवान् तथा शिष्यौ द्वौ (पुष्पदन्त भूतबलि च) सहयोगेन ग्रन्थस्यास्य सम्पूर्ति जाता। तदनन्तरं आचार्येण गुणधरेण 'कषायपाहुड' इति नाम्नः ग्रन्थस्य रचना कारिता। तत्पश्चात् विभिन्नैः आचार्यैः अनेकेषां ग्रन्थानां रचना कृता। ऐते सर्वे ग्रन्थाः आगम इव प्रामाणिकः सन्ति।

अनेन एव प्रकारेण जैनदर्शने कालक्रमानुसारेण एका बृहद् परम्परा अस्ति या अद्यपर्यन्तं निर्बाधगतिना प्रवहति।

दर्शनशास्त्रास्य उद्गमो जिज्ञासायामन्तर्निहितः। जिज्ञासापि मूलतो जीवस्वरूपस्यैव विद्यते सर्वेषां मनसि, अत एव सर्वेषु दर्शनेषु जीवस्वरूपविवेचनंप्राधन्येन प्राप्यते। अहमत्रा जैननये जीवस्य किं स्वरूपम्? अस्मिनेव विषये चर्चां करोमि।

### 1. जीवशब्दस्य व्युत्पत्तिः, नैकानि च नामानि-

जैनाचार्यैर्जीवस्य व्युत्पत्तिरपि प्रकाशिता। सा चेयम्-

**'पाणेहि चदुहि जीवदि जीविस्सदि जो हि जीविदो पुव्वं ।'**[4]

अथवा-

**'दशसु प्राणेषु यथोपात्तप्राणपर्यायेण त्रिषु कालेषु जीवनानुभवनात् जीवति अजीवत् जीविष्यति इति वा जीवः।**[5]

अथवा-

**'शुद्धिनिश्चयेन शुद्धचैतन्यलक्षणनिश्चयप्राणेन यद्यपि जीवति, तथाप्यशुद्धनयेनद्रव्यसप्राणैर्जीवतीति जीवः।'**[6]

अर्थात् इन्द्रियबलायुश्वासोच्छवासरूपैश्चतुर्भिः प्राणैः अथवा एतेषामेव विस्तरेण दशभिः प्राणैर्वा जीवति स जीवः। मुत्तफजीवेषु यद्यप्येते द्रव्यप्राणा न सन्ति तथापि पुर्वमजीविन् एतस्माद् हेतोः उत शुद्धचैतन्यप्राणधरणात् ते जीवा इति वत्तुफं शक्यन्ते।

जीवस्य पर्यायवाचिनः शब्दा आचार्यजिनसेनानुसारमेते सन्ति तेषाञ्चभिप्रायोऽपि निम्नानुसारमस्ति-

**जीवः प्राणी च जन्तुश्च क्षेत्राज्ञः पुरुषस्तथा।**
**पुमानात्मान्तरात्मा च ज्ञो ज्ञानीत्यस्य पर्ययः।।**
**प्राणदशास्य सन्तीति प्राणी जन्तुश्च जन्मभाक्।**
**क्षेत्रां स्वरूपमस्य स्यात्तज्ज्ञानात् स तथोच्यते।।**
**पुरुषस्य पुरुभोगेषु शयनात् परिभाषितः।**
**पुनात्यात्मानमिति च पुमानिति निगद्यते।।**
**भवेष्वतति सातत्याद् एतीत्यात्म निरुच्यते।**
**सोऽन्तरात्माष्कर्मान्तिर्वर्तित्वादभिलप्यते।।**
**ज्ञः स्याज्ज्ञानगुणोपेतो ज्ञानी च तत एव सः।**
**पर्यायशब्दैरेभिस्तु निर्णेयाऽन्यैश्च तद्विधैः।।**[7]

अनेनप्रकारेण जीवस्य नैकानि नामान्यपि जैनाचार्यैरुत्तफानि तेषाञ्च नाम्नामभिप्रायोऽपि स्पष्टीकृतः।

### 2. जीवस्य लक्षणम्

जैनदर्शने जीवस्य लक्षणमित्थं प्रतिपादितम्-

**'उपयोगो लक्षणम्।**[8]

'अथवा-

**'चेतनालक्षणो जीवः।**[9]

अर्थात् उपयोग एव जीवस्यात्मभूतं लक्षणमस्ति। उपयोगशब्दस्यार्थोऽत्रा 'चेतना' इति ग्राह्यः। आत्मा चैतन्यमयाऽस्ति ज्ञानमयोऽस्तीति जैनानामभिप्रायः। यद्यपि नैयायिकाः वैशेषिकाश्चापि ज्ञानमात्मनो गुणं स्वीकुर्वन्ति, तथापि तत्रा गुणगुणिनौ भिन्नौ पदार्थौ स्तः, तथा च समवायेनैव तयोः सम्बन्धः स्वीकृतः। तेषां मते आत्मा ज्ञानवानिति तु वक्तुं शक्यते किन्तु आत्मा ज्ञानमय, इति न वत्तुफं शक्यते। जैनदर्शनानुसारं जीवो ज्ञानमय एव, न तु ज्ञानवान्, यतो हि ज्ञानं तस्य अग्नेरौष्ण्यमिव स्वभावः। आचार्यकुन्दकुन्ददेवाः कथयन्ति आत्मा ज्ञानं च भिन्नं भिन्नं द्वे द्रव्ये स्यातां तर्हि तद्यदि द्वयोरेवाचेतनत्वापत्तिः। यथा-

**णाणी णाणं च सदा अत्थंतरिदो दु अण्णमण्णस्स।**
**दोण्हं अचेदणत्तं पसजदि सम्मं जिणावमदं।।**
**ण हि सो समवायादो अत्थंतरिदु णाणद णाणी।**

**अण्णाणीति य वयणं एगत्तप्पसाधकं होदि।।**[10]

आत्मनो लक्षणभूतस्यास्योपयोगस्यानेके भेद-प्रभेदा अपि जैनशास्त्रोषु विस्तरेण वर्णिताः। तद्धत्रा संक्षेपेणैव निम्नलिखितया सारिण्या प्रदर्शिताः-




**3. जीवस्य स्वरूपम्-**

जीवस्य स्वरूपविषये एका प्राकृतगाथा अत्यन्तं महत्त्वपूर्णा वर्तते। सा चेयम्-

**'जीवो उवओगमओ अमुत्ति कत्ता सदेहपरिमाणो।**
**भोत्ता संसारत्थो सिद्धो सो विस्ससोड्ढगदी।।**[11]

अस्याभिप्रायाऽयं यत् जीवस्य स्वरूपज्ञापका नवाधिकसः सन्ति- 1. जीवः, 2. उपयोगमयः, 3. अमूर्तिकः, 4. कर्ता, 5. स्वदेहपरिमाणः, 6. भोक्ता, 7. संसारस्थः, 8. सिद्धः, 9. विस्रसोधर्वगतिश्च। एतेषां संक्षिप्तविवरणं निम्नलिखितानुसारमस्ति-

1. **जीवः**- यो निश्चयेन चेतनाप्राणैव्र्यवहारेण वा इन्द्रियवायुश्वासोच्छवासै श्चतुर्भिर्द्रव्यप्राणैर्जीवति स जीवः।
2. **उपयोगमयः**- जीव उपयोगमयाऽस्ति। 'उपयोग' शब्दस्यार्थः 'चेतना' इति। चेतना उपयोगो वा द्विविधः- दर्शनोपयोगो ज्ञानोपयोगश्चेति। अनयोरपि अनेके प्रभेदाः सन्ति ते सघेक्ष्पेण पूर्वमेव सारिण्या परिगणिताः।
3. **अमूर्तिकः**- जीवः संसारे देहादीनां संयोगात् मूर्तिकाऽस्ति, किन्तु स्वभावेन अमूर्तिक एव, यतो स्पर्शरसगन्धवर्णादयः तस्मिन्न विद्यन्ते। ये चार्वाका जीवं भूतजनितं मूर्तिकं मन्यन्ते ते न समीचीनाः।
4. **कर्ता-** जीवो व्यवहारेण पौद्गलिककर्मणां कर्ता भवति निश्चयेन च स्वकीयशुद्धाशुद्धभावानामेव कर्ता भवति। सांख्याभिमतमात्मनः सर्वथाऽकर्तृत्वमसमीचीनम्।
5. **स्वदेहपरिमाणः**- आत्मा संसारावस्थायां स्वशरीरपरिमाण एव, मुत्तफावस्थायान्तु अन्तिमशरीरपरिमाणो विराजते। ये कथयन्ति आत्मानं वटकणिकामात्रामुत सर्वलोकव्यापकं तन्न समीचीनम्।
6. **भोक्ता-** आत्मा स्वकर्मणां स्वकीयशुद्धाशुद्धभावानाञ्च यथा कर्ताऽस्ति तथैव भोत्तफाऽपि वर्तते। बोद्धाः क्षणिकत्वेनात्मानं भोत्तफारं न स्वीकुर्वन्ति, तदपि नैवोचितम्।
7. **संसारस्थः**- आत्मा अशुद्धावस्थायां संसारे निवसति, अतः संसारस्थोऽपि स्वीकृतः। ये जना आत्मानं सर्वथा शुद्ध कर्मरहितं च मन्यन्ते तऽत्रा निराकृताः।
8. **सिद्धः-** मुत्तफावस्थायामयमात्मा सिद्धरूपेण विराजते। तत्रास्याभावो न भवति, यथा बौद्धदर्शने स्वीक्रियते, अपि तु वीतरागः सर्वज्ञः सर्वकर्मरहितः अनन्तगुणसहितः परमसुखी च सन् अनन्तकालपर्यन्तं लोकाग्रे निवसति। ये जना मुत्तफावस्थायां जीवस्यैवाभावं जीवस्य वा ज्ञानादिगुणानामभावं स्वीकुर्वन्ति ते न ग्राह्याः। सिद्धजीवाः पुनः कदापि संसारे जन्म न धरयन्ति। अवतारवादो जैनदर्शने न स्वीकृतः। यथा दुग्धद् घृतं भवति, किन्तु घृतात् पुनः दुग्धा न भवति, तिलेभ्यः तैलं भवति, किन्तु तैलात् पुनः तिलं न भवति, तथैव संसारी मुत्तफो भवति, किन्तु मुत्तफजीवः पुन कदापि संसारी ;संसरणं करोतीति संसारीद्ध न भवति।
9. **mQèkoxeuLoHkko%&** अयं जीवो यद्यपि संसारावस्थायां कर्माधीनत्वात् तिर्यग्गमनम् अधेगमनं वा करोति, तथापि नास्त्ययं तस्य स्वभावः।

स्वभावेन तु स उफध्र्वगमनमेव करोति अग्निशिखावत्।

**4. जीवस्य भेदप्रभेदाः-**

अथ जीवस्य भेदप्रभेदा अपि सङ्क्षेपेण ऊह्याः। जैनाचार्यैर्विविधदृष्टिभिर्जीवस्य नैका भेदप्रभेदा वर्णिताः। यथा-

**एको चेव महप्पा सो दुवियप्पो त्ति लक्खणो भणिदो।**
**चदुसण्कमणाजुत्तो पञ्चग्गगुणप्पहाणो य।।**
**छक्कापक्कमजुत्तो उवजुत्तो सत्तभण्गिसब्भावो।**
**अट्ठासवो णवट्ठो जीवो दसठाणिओ भणिदो।।**[12]

अर्थादयं जीवो महात्मा वा चैतन्यसामान्यापेक्षया एकविधः, ज्ञानदर्शनभेदेन संसारिमुक्तभेदेन भव्याभव्यभेदेन पापपुण्यभेदेन वा द्विविधः, ज्ञानकर्मकर्मपफलचेतनाभेदेन द्रव्यगुणपर्यायभेदेन उत्पादव्ययध्रौव्यभेदेन वा त्रिविधः, नरकतिर्यञ्चदेवमनुष्यगतिभेदेन चतुर्विधः, औपशमिकक्षायिकमिश्रश्चैदयिकपारिणामिकभेदेन एकेन्द्रियद्वीन्द्रियत्रीन्द्रिय- चतुरिन्द्रियपञ्चेन्द्रियभेदेन वा पञ्चविधः, षट्कापक्रमभेदेन षड्विधः, सप्तभघैभेदेन सप्तविधः, अष्टकर्माधिरेण सम्यक्त्वाद्यष्टगुणोपेतेन वा अष्टविधः, नवपदार्थरूपपरिणमनान्नवविधः, पृथिव्यादिपञ्चस्थावरभेदेन एकेन्द्रियादिपञ्चभेदेन च दशविधः। एवम्प्रकारेण अन्यऽपि भेदप्रभेदा भवितुमर्हन्ति। अत्रा विस्तरभयाद् जीवस्य प्रमुखा भेदप्रभेदा अधेलिखितया

सारिण्या एव प्रदश्र्य विरम्यते-

जीवाः
- संसारिणः
  - स्थावराः
    1. पृथ्वीकायिकाः
    2. जलकायिकाः
    3. अग्निकायिकाः
    4. वायुकायिकाः
    5. वनस्पतिकायिकाः साधरणवनस्पतिकायिकाः प्रत्येकवनस्पतिकायिकाः
  - त्रसाः
    1. द्वीन्द्रिया(कृमिकीटादयः)
    2. त्रीन्द्रियाः(पिपीलिकादयः)
    3. चतुरिन्द्रियाः(भ्रमरादयः)
    4. पञ्चेन्द्रियाःसमनस्काः(मनुष्यादयः)
       अमनस्काः(केचनसर्पादयः)
- मुक्ताः

**5. जीवस्वरूपपरिज्ञानस्यावश्यकता-**

सर्वप्रथमं त्वेकं महत्त्वपूर्णं तथ्यमिदमवगन्तव्यं यत् जैनदर्शनानुसारं जीवस्वरूपपरिज्ञानमतीवावश्यकं वर्तते, यतो हि तेन बिना कथमपि दुःखपरिहारः सुखप्राप्तिश्च न भवितुमर्हति। जैनाचार्यैः पुनः पुनः प्रतिपादितं यत् सर्वे जीवाः स्वरूपज्ञानाभावादेव अनन्तदुःखं सहमानाः संसारे परिभ्रमन्ति। तेषां सर्वदुःखानां कारणं परमार्थेन स्वरूपभ्रान्तिरेव, न तु अन्यत् किमपि। अतः संसारदुःखभयभीतेन सुखाभिलाषिणा वा सर्वप्रथमं महत्प्रयत्नमपि कृत्वा आत्मस्वरूपपरिज्ञानं कर्तव्यम्।

**आचार्यामृतचन्द्रास्तु 'अयि कथमपि मृत्वा' इति लिखन्ति आत्मख्यातौ।**[13]

यावत्कालपर्यन्तमयं जीव आत्मस्वरूपं न जानाति तावत्कालपर्यन्तं परमपि न ज्ञातुं शक्नोति। स्वपरज्ञानाभावाच्च कथमपि रागद्वेषादीन् न विजहति मोक्षमार्गे च चलितुं नार्हति। यदा चायम् आत्मस्वरूपं जानाति तदैव परपरिहारो भवति, रागद्वेषादीन् च सहजतया विजहति, मोक्षमार्गे च पदं स्थापयित्वा मोक्षलाभं करोति। यथा-

**जीवाजीवं द्वयं त्यक्त्वा नापरं विद्यते यतः।**
**तल्लक्षणं ततो ज्ञेयं स्वस्वभावबुभुत्सया।।**
**यो जीवाजीवयोर्वेति स्वरूपे परमार्थतः।**
**सोऽजीवपरिहारेण जीवतत्त्वे निलीयते।।**
**जीवतत्त्वनिलीनस्य रागद्वेषपरिक्षयः।**
**ततः कर्माश्रयच्छेदस्ततो निर्वाणसण्गमः।।**
**परद्रव्यबहिर्भूतं स्वस्वभावमवैति यः।**
**परद्रव्ये स कुत्रापि न च द्वेषि न रज्यति।।** [14]

जैनाचार्यैर्जीवाऽयं स्वरूपपरिज्ञानार्थं भूरिशः पे्ररितः। तदर्थञ्च इदमपि तैरुत्तफं यत् स्वरूपपरिज्ञानं विना यदि काऽपि जीवो बहुविद्याभ्यासं करोति, असंख्यान् पदार्थान् जानाति, शास्त्राणि अहर्निशं पठति, तपश्चरणादिकमपि करोति, तर्हि तस्य तत्सर्वमपि निरर्थकमेव, यतो हि तेन दुःखनिवारणं

पारमार्थिकसुखस्य च लाभो न भवितुमर्हति। तस्मादादावेव आत्मज्ञानं करणीयम्। आत्मज्ञानरहितं शास्त्राभ्यासिनं प्रति कथयंन्त्याचार्यामितगतिदेवाः-

**आत्मध्यानरतिज्र्ज्ञेयं विद्वत्तायाः परं पफलम्।**
**अशेषशास्त्राशास्तृत्वं संसारोऽभाषि धीधनैः।।**[15]

योगीन्दुदेवा अपि अस्मिन् सन्दर्भे कथयन्ति-

**सत्थ पढंतहँ ते वि जड अप्पा जे ण मुणंति।**
**तहिं कारण ए जीव पफुड्ड ण हु णिव्वाणु लहंति।।**[16]

अत्रा यदि निमिषमात्रां विरम्य तुलनात्मकमध्ययनं क्रियते तर्हि ज्ञातं भवति यदात्मस्वरूपपरिज्ञानस्य एतादृशी महती आवश्यकता न केवलं जैनशास्त्रोष्वेव प्रतिपादिता, अपि तु वैदिकदर्शनेष्वपि भूरिशो वर्णिता। उदारहरणार्थं कानिचिदद्धरणवाक्यानि अत्रा प्रस्तूयन्ते-

**(1) ‘नानाशास्त्रां पठेल्लोक नानादेव ञच पूजयेत्।**
**आत्मज्ञानं विना पार्थ! मुक्तिफर्नास्ति न संशयः।।**[17]
**(2) ‘सुखदुःखप्रदो नान्यः पुरुषस्यात्मविभ्रमः।**[18]
**(3) ‘आत्मज्ञानविहीना मूढास्ते पच्यन्ते नरकनिगूढाः।**[19]
**(4) ‘यस्मिन् विज्ञाते सर्वं विज्ञातं भवति।**[20]
**(5) ‘आत्मा वा अरे द्रष्व्यो श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रोश्य्यात्मनो**
**वा अरे दर्शनेन श्रवणेन मत्या वा विज्ञानेनेदं सर्वं विदितम्।** [21]
**(6) ‘आत्मानं नैव जानाति दर्वी पाकरसं यथा।**[22]

इत्थमिदं सुस्पषंट यत् जीवस्वरूपपरिज्ञानं न केवलमावश्यकमपि तु अनिवार्यमेव। अस्माकं देशऽध्यात्मविद्याया उद्गमो विकासो महत्त्व ञच आत्मज्ञानार्थमेवाण्गीकृतमिति मे मतिः। सर्वे दार्शनिका विद्वांसः सावधनतया निष्पक्षरीत्या च विचारयन्तु। विस्तारभयादहमत्रा सर्वेषंा सामान्यज्ञानार्थं संक्षेपेण बिन्दुशश्च किमपि वक्ष्यामि। यद्यस्ति विशेषजिज्ञासा तर्हि इमे जैनग्रन्थाः प्रामुख्येन पठनीयाः- समयसारः, पञचास्तिकायः, द्रव्यसङ्ग्रहः, योगसारः, तत्त्वार्थसूत्राम्, जैनेन्द्रसिद्धान्तकोशश्चेत्यादयः, आधुनिककृतिषु च पण्डितकैलाशचन्द्रस्य जैनधर्मः,पण्डितचैनसुखदासस्य च अर्हत्प्रवचनं विशेषरूपेण पठनीयाः।

### 6. जीवस्यास्तित्वसिद्धिः-

जैनदर्शनं जीवस्य सत्तायां विश्वसिति। सः शून्यवादी अभाववादी वा नास्ति। ये जना जीवस्य सत्तामेव न स्वीकुर्वन्ति तेषां निराकरणार्थं जीवस्य सत्तायाः सिद्ध्यर्थञच जैनाचार्यैरनेका युक्तफयः प्रस्तुताः।यथा-

‘याऽयमस्माकम् ‘आत्माऽस्ति’ इति प्रत्ययः स संशयानध्यवसायविपर्ययसम्यक्प्रत्ययेषु यः कश्चित् स्यात्, सर्वेषु च विकल्पेष्विषंट सिद्ध्यति। न तावत् संशयः, निर्णयात्मकत्वात्। सत्यपि संशये तदालम्बनात्मसिद्धिः। न हि अवस्तुविषयः संशयो भवति। नाप्यनध्यवसायो जात्यन्धबधिररूपशब्दवद् अनादिसम्प्रतिपत्तेः स्याद्विपर्ययः, एवमप्यात्मास्तित्वसिद्धिः,

**पुरुषे स्थाणुप्रतिपत्तौञ्च स्थाणुसिद्धिवत्।**
**स्यात्सम्यक् प्रत्ययः, अविवादमेतत्।**[23]

एवमन्यैरप्यनेकैरकाट्यैस्तर्कैर्जैनाचार्या जीवस्य सिद्धिं कृतवन्तः।

### 7. अध्यात्मग्रन्थेषु जीवस्य भेदप्रभेदाः-

यथा पूर्वमेवोक्तं यत् जीवस्वरूपपरिज्ञानप्रेरणार्थमेवास्माकं देशेऽध्यात्मविद्याया उद्गमो विकासो महत्त्वञच भूरिशः प्रतिपादितम्। अत एव अध्यात्मग्रन्थेषु जीवस्य कृते ‘आत्मन्’ शब्दस्य प्रयोगो विहितः। अध्यात्मग्रन्थानुसारं जीवः द्विविधः- स्वजीवः परजीवश्चेति। स्वजीव एव आत्मा। परजीवो नास्ति आत्मा। अतो यदा आचार्याः कथयन्ति यदात्मानं जानातु, आत्मज्ञानमावश्यकं तदा तस्याभिप्रायाऽयमेव यत् स्वजीवं जानातु, न तु परजीवम्। अध्यात्मग्रन्थेषु परजीवो जीव एव नास्तीत्यप्युच्यते। इदमेव कारणं यदस्माकं संस्कृतौ जना अद्यापि कथयन्ति यदात्मा एक एव विद्यते, किन्तु जीवा अनन्ताः सन्ति।

अत्रौकः प्रश्नः समुदेति यदध्यात्मग्रन्थानुसारं यदाऽत्मा एक एव तर्हि तस्य भेदप्रभेदाः कथं भवितुमर्हन्ति। उत्तरम्-सत्यमिदं यदध्यात्मग्रन्थाः कथयन्ति आत्मानमेव जानातु, परद्रव्यं परजीवं प्रति निमिषमात्रामपि मा पश्यतु, एकस्य आत्मनो ज्ञानादेव सर्वं विज्ञातं भवति स्वयमेव,

**सर्वार्थिसिद्धिः आत्मज्ञानादेव भविष्यति ।** [24]

आत्मा च एक इत्थं, किन्तु तस्य एकस्यापि आत्मनोऽवस्थापेक्षया त्रायो भेदा भवन्ति। ते च एवं ज्ञातव्यः -

**1) बहिरात्मा- यो ज्ञानी मूढाऽस्ति, बहिर्भूतं देहमेवात्मानं जानाति स बहिरात्मा।**[25]
**2) अन्तरात्मा- य सम्यग्ज्ञानी जातः देहाद्भिन्नमात्मतत्त्वं जानाति सोऽन्तरात्मा।**[26]
**3) परमात्मा- य आत्मानं ज्ञात्वा रागद्वेषादिविकारान् परित्यज्य वीतरागः सर्वज्ञश्च भवति स परमात्मा।**[27]

परमात्मा द्विविधः

**(क) सकलपरमात्मा- यः शरीरसहितो विद्यते अधुना सः सकलपरमात्मा, अर्हन् इति तस्यैवापरं नाम।**[28]
**(ख) निकलपरमात्मा- यदा अर्हन् परमात्मा देहमपि परित्यज्य मुक्तफो भवति तदा स निकलपरमात्मा इत्युच्यते। सिद्ध इति तस्यैव अपरं नाम।**[29]

**एतेषु बहिरात्मा हेयः, अन्तरात्मा कथञिचदुपादेयः परमात्मा च परमोपादेयः।**[30]

**8. अन्यः कश्चिद् विशेषः-**

जैनाचार्येषु योगीन्दुदेवानामतिमहत्त्वपूर्णं स्थानं विद्यते। तैरपि स्वग्रन्थेषु योगसारपरमात्मप्रकाशादिषु जीवस्य स्वरूपं विस्तरेण प्रतिपादितम्। परमात्मप्रकाशग्रन्थे प्रथममहाधिकारे जीवस्वरूपविषये ते कथयन्ति षड्दोहकसूत्रैः-

कि वि भणंति जिउ सव्वगउ जिउ जडु के वि भणंति।

**कि वि भणंति जिउ देहसमु सुण्णु वि के वि भणंति।।**
**अप्पा जोइय सव्वगउ अप्पा जडु वि वियाणि।**
**अप्पा देहपमाणु मुणि अप्पा सुण्णु वियाणि।।**
**अप्पा कम्मविवज्जियउ केवलणाणँ जेण**
**लोयालोउ वि मुणइ जिय सव्वगु वुच्चइ तेण।।**
**जे णियबोहपरिट्ठियहँ जीवहँ तुट्टइ णाणु।**
**इन्दियजणियउ जोइया तिं जिउ जडु वि वियाणु।।**
**कारणविरहिउ सुद्ध जिउ वड्ढइ खिरइ ण जेण।**
**चरमसरीरपमाणु जिउ जिणवर बोल्लहिं तेण।।**
**अट्ठ वि कम्मइँ बहुविहइँ णव णव दोस वि जेण।**
**सुद्धहँ एक्कु वि अत्थि णवि सुण्णु वि वुच्चइ तेण।।** [31]

अभिप्रायोऽयं यद् हे गुरुदेव! कस्ंमिश्चिद्दर्शनऽयं जीवः सर्वगतः कथितः, कस्ंमिश्चिद्दर्शने जडो निरूपितः, कस्ंमिश्चिद्दर्शने स्वदेहपरिमाणः प्ररूपितः, कस्ंमिश्चिच्च दर्शने शून्यो वरणतः। तत् कथम्?

आचार्यः समादधति-अपेक्षाभेदेन सर्वं समीचीनं वक्तुं शक्यते। यथा-अयं जीवः केवलज्ञानेन सर्वं लोकालोकं जानाति तस्माद् सर्वज्ञः, सदैव स्वशरीरपरिमाणं चरमशरीरपरिमाणं वा वसति, हीनाऽधिको वा न भवति तस्माद् स्वशरीरपरिमाणः, पौद्गलिककर्मादि सर्वपरद्रव्यविरहितत्वाच्च शून्य इति। नास्ति काचिद् बाध।

अत्रा योगीन्दुमुनिना स्याद्वादमवलम्ब्य यत् समाधनं कृतं तद् विशेषरूपेण चिन्तनीयमस्माभिः सर्वैः। तात्पर्यमिदं यत् जीवस्य कृते जैनेतरदर्शनेष्वपि यत्किमपि प्रोत्तंफ तत्सर्वमपि सामान्यतया समीचीनं भवितुमर्हति जैनदृष्ट्या किन्तु तस्य अपेक्षा दृष्टिकोणं वा सम्यक्तयाऽवगन्तव्यमेव। सापेक्षकथनं समीचीनं, निरपेक्षकथनं तु मिथ्या एव। मया तु इदमनुभूयते यद् अस्मावंफ भारतीयसंस्कृतौ यत् किमपि पूर्वजैः ज्ञानिध्यानिभिः प्रतिपादितं तत्सर्वं समीचीनमेव आसीत्, किन्तु एका एव विसंगतिः जाता यद् अस्माभिस्तस्य का अपेक्षा किं वा दृष्टिकोणमिति विस्मृतम्। अद्यावश्यकताऽस्ति तद्दृष्टिकोणप्रकाशनस्य महती।

एवमेव, जैनदर्शनानुसारं जीवा अनन्ताः सन्ति, न तु एकः, तथापि वेदान्तदर्शनं कथयति यत् जीव एक एव इत्यपि समीचीनं भवितुमर्हति। तदित्थं यद्यपि जीवाः संख्यापेक्षया अनन्ता एव, किन्तु जात्यपेक्षया स्वभावापेक्षया निश्चयेन वा सर्वे सदृशा एव समाना एव, न तु कोऽपि जीवः लघुः, न तु काऽपि गुरुः, अतो जीव एक इत्यपि वत्तुंफ शक्यते। जीवाः संख्यापेक्षया अनन्ताः सन्ति, तथापि सर्वेषां पारमाथरिकस्वभावः समान एव, सर्वे जीवाः स्वभावेन अनन्तज्ञानदर्शनसुखवीर्यादिगुणसम्पन्नाः स्पर्शरसगन्धवर्णविरहिताश्च सन्ति, सर्वे एव रागद्वेषमोहादीन् परित्यज्य परमात्मा भवितुमर्हन्ति। परमात्माऽपि स्वभावेन सर्वसदृश एव- 'अप्पा सो परमप्पा' इत्युत्तफत्वात्। इदमेव कारणं यज्जैनदर्शनानुसारं परमात्माऽपि कश्चन एक एव नास्ति, अपि तु अनन्ताः सन्ति। यऽपि आत्मानः पुरुषार्थं कृत्वा स्वस्य विकारान् निवारयन्ति ते एव शद्धात्मानः परमात्मानो वा भवन्ति। जैनदृष्ट्या परमात्मा कोऽपि पृथक् नास्ति, अपि तु अस्मासु एव यः काऽपि पुरुषार्थं कृत्वा रागद्वेषादीन् विजहति स एव परमात्मा भवति। परमात्मा वीतरागः सर्वज्ञश्च विद्यते। स कदापि केनापि सह रुष्टतुष्टो वा न भवति। काममपि इच्छामपि न करोति, जगतः किञ्चित्कार्यमपि न करोति। स तु ज्ञाता द्रष्टा भवन् अनन्तकालपर्यन्तं लोकाग्रे तिष्ठति। यद्यपि परमात्मा अनन्तशक्तिशाली अस्ति तथापि परद्रव्यस्य किमपि कार्यं न करोति। स सदाकालं स्वस्य शुद्धस्वरूपे रमति, कदापि परद्रव्याणि विलोक्य रागं द्वेषं वा न करोत्ययमेव तस्यानन्तशक्तिः।

**9. उपसंहारः-**

एवम्प्रकारेणेदं सुस्पष्टं यज्जैनदर्शनानुसारेण-

- ❖ जीवोऽस्ति एव, तस्य च सत्ता परमार्थिकी एव, न तु व्यावहारिकी काल्पनिका वा।
- ❖ जीवस्य लक्षणमुपयोगमयत्वं चैतन्यं वा विद्यते। चैतन्यं तस्य स्वाभाविको धर्मः, न तु समवायजनितः।
- ❖ जीवः स्वभावेन रूपरसस्पर्शादिगुणविरहिताऽमूर्तिको विद्यते, किन्तु संसारावस्थायां पौद्गलिककर्मदेहादीनां संयोगोऽपि विद्यते।
- ❖ विवक्षाभेदेनायं जीवः सर्वगतः, जडः, स्वशरीरपरिमाणः, शून्यः एकश्चेत्यपि वत्तुंफ शक्यते।
- ❖ प्रत्येकं जीव आत्मा वा स्वस्य रागद्वेषादिविकारन् परित्यज्य परमात्मा भवितुमर्हति। स एव मुत्तफावस्था। मुत्तफावस्थायां जीवस्य तस्य ज्ञानादिस्वभाविकगुणानां वाऽभावो न भवति, अपि तु तस्य समस्तविकाराणामेव विनाशो भवति। मुक्त्यनन्तरं जीवः पुनः कदापि संसारे आगत्य जन्म मरणं वा न करोति।
- ❖ जीवा अनन्ताः सन्ति, न तु एकः। ते च सर्वे स्वभावेन समाना एव। न काऽपि गुरुः लघुः वा।
- ❖ जीवः स्वतन्त्रोऽखण्डो वा विद्यते। सः कस्यचिदेकस्य परमतत्त्वस्यांशो नास्ति। स्वकीयशुभाकर्मणां स्वयमेव कताऽपि भवति भोत्तफा चापि भवति। अन्यद्रव्यं तु निमित्तमात्रामेव।

## सन्दर्भ संकेत


1. हेमचन्द्रसूरि,स्याद्वमञजरी, प्रस्तावना, पृष्ठ-7।
2. आचार्यामृतचन्द्रः, पञचास्तिकायसमयव्याख्या।
3. केन उपनिषद्, 1/1
4. आचार्यकुन्दकुन्दः, प्रवचनसारः, गाथा-147
5. आचार्याकलंकः, तत्त्वार्थवार्तिकम्-1/4
6. ब्रह्मदेवसुरिः, बृहद्द्रव्यसंग्रहवृत्तिः,गाथा-2
7. आचार्यजिनसेनः, महापुराणम्-24/103, 105 तः 108
8. आचार्योमास्वामी, तत्त्वार्थसूत्राम्, 2/8
9. आचार्यदेवनन्दिः, सर्वार्थसिद्धिः 1/4
10. आचार्यकुन्दकुन्दः, पञचास्तिकायः, गाथा -48, 49
11. आचार्यनेमिचन्द्रसिद्धान्तिदेवः, बृहद्द्रव्यसंग्रहः, गाथा-2
12. आचार्यवीरसेनः, धवला, पुस्तक 9, खण्ड 4, भाग 1, सूत्रा 45, गाथा- 76-77
13. आचार्यामृतचन्द्रः, समयसारव्याख्या, आत्मख्यातिः, गाथा-23
14. आचार्यामितगतिः, योगसारप्राभृतम्, 1/2
15. आचार्यामितगतिः, योगसारप्राभृतम्, 7/43
16. आचार्ययोगीन्दुकृतयोगसारः, 53
17. गीता
18. श्रीमद्भागवत-11/23/60
19. शघङ्कराचार्यः,मोहमुद्गरः, श्लोकः 26
20. छान्दोग्योपनिषद्।
21. बृहदारण्यकोपनिषद्, 4/4/5
22. उपनिषद्।
23. आचार्याकलघङ्कः, तत्त्वार्थवार्तिकम्, 2/8
24. अचिन्त्यशक्तिः स्वयमेव देवः, चिन्मात्राचिन्तामणिरेष यस्मात्।
25. सर्वार्थसिद्धात्मतया विधत्ते ज्ञानी किमन्यस्य परिग्रहेण।।- आत्मख्यातिः, श्लोक-144 आचार्यामृतचन्द्रः,
26. आचार्यदेवनन्दिपूज्यपादः, समाधिशतकम्- 7
27. आचार्यदेवनन्दिपूज्यपादः, समाधिशतकम्- 15
28. योगीन्दुदेवः, परमात्मप्रकाशः, 1/14
29. कार्तिकेयानुप्रेक्षा, गथा-192
30. ब्रह्मदेवसूरिः, बृहद्द्रव्यसंग्रहवृत्तिः, गथा-14
31. योगीन्दुदेवः, परमात्मप्रकाशः, 1/50 तः 55